श्री महाविद्या कवच स्तोत्रम्

विनियोग:
ॐ अस्य श्री महाविद्या कवचस्य
श्री सदाशिव ऋषि:
उष्णिक छन्द: श्री महाविद्या देवता
सर्वसिद्धि प्राप्यर्थे पाठे विनियोग: ।

ऋष्यादि न्यास:
श्री सदाशिव ऋषये नम: शिरसे
उष्णिक छन्दसे नम: मुखे
श्री महाविद्या देवतायै नम: हृदि
सर्वसिद्धि प्राप्यर्थे पाठे विनियोगाय नम: सर्वाङ्गे ।

ॐ पृथवी तत्त्वात्मकं गन्धं श्री महाविद्या प्रीत्यर्थे समर्पयामि नम: ।
ॐ हं आकाश तत्त्वात्मकं पुष्पं श्री महविद्या प्रीत्यर्थे समर्पयामि नम: ।
ॐ यं वायु तत्त्वात्मकं धूपं श्री महाविद्या प्रीत्यर्थे घ्रापयामि नम: ।
ॐ रं अग्नि तत्वात्मकं दीपं श्री महाविद्या प्रीत्यर्थे दर्शयामि नम: ।
ॐ वं जल तत्त्वात्मकं नैवेद्यं श्री महाविद्या प्रीत्यर्थे निवेदयामि नम: ।
ॐ सं सर्व तत्त्वात्मकं तांबूलं श्री महाविद्या प्रीत्यर्थे निवेदयामि नम: ॥

ॐ अस्य श्री महाविद्या कवच स्तोत्रम्

ॐ प्रच्यां रक्षतु मे तारा कामरूप निवासिनी ।
आग्नेय्यां षोडशी पातु याम्यां धूमावती स्वयम् ॥ 1 ॥

नैऋत्यां भैरवी पातु वारुण्यां भुवनेश्वरी ।
वायव्यां सततं पातु छिन्नमस्ता महेश्वरी ॥ 2 ॥

कौबेर्यां पातु मे देवी श्रीविद्या बगलामुखी ।
ऐशान्यां पातु मे नित्यं महात्रिपुरसुन्दरी ॥ 3 ॥

ऊर्ध्वं रक्षतु मे विद्या मातङ्गी पीठवासिनी ।
सर्वत: पातु मे नित्यं कामाख्या कालिका स्वयम् ॥ 4 ॥

ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वयम् ।
शीर्षे रक्षतु मे दुर्गा भालं श्रीभवगेहिनी ॥ 5 ॥

त्रिपुरा भ्रूयुगे पातु शर्वाणी पातु नासिकाम् ।
चक्षुषी चण्डिका पातु श्रोत्रे नीलसरस्वती ॥ 6 ॥

मुखं सौम्यमुखी पातु ग्रीवां रक्षतु पार्वती ।
जिह्वां रक्षतु मे देवी जिह्वाललनभीषणा ॥ 7 ॥

वाग्देवी वदनं पातु वक्ष: पातु महेश्वरी ।
बाहु महाभुजा पातु कराङ्गुली सुरेश्वरी ॥ 8 ॥

पृष्ठत: पातु भीमास्या कट्यां देवी दिगंबरी ।
उदरं पातु मे नित्यं महाविद्या महोदरी ॥ 9 ॥

उग्रतारा महादेवी जन्घोरू परिरक्षतु ।
गूदं मुष्कं च मेढ्रं च नाभीं च सुरसुन्दरी ॥ 10 ॥

पदाङ्गुली: सदा पातु भवानी त्रिदशेश्वरी ।
रक्तं मांसास्थी मज्जादिन पातु देवी शवासना ॥ 11 ॥

महाभयेषु घोरेषु महाभय निवारिणी ।
पातु देवी महामाया कामाख्या पीठवासिनी ॥ 12 ॥

भस्माचलगता दिव्यसिंहासन कृताश्रया ।
पातु श्रीकालिकादेवी सर्वोत्पातेषु सर्वदा ॥ 13 ॥

रक्षाहीनं तु यत्स्थानं कवचेनापि वर्जितम् ।
तत्सर्व सर्वदा पातु सर्वरक्षण कारिणी ॥ 14 ॥

॥ इति श्री महाविद्या कवच स्तोत्रं संपूर्णम् ॥